# Godavari Stotram 2

# ગોદાવરીસ્તોત્રમ્ ૨

## Document Information

Text title : Godavari Stotram 2

File name : godAvarIstotram2.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# ગોદાવરીસ્તોત્રમ્ ૨

યા સ્નાનમાત્રાય નરાય ગોદા ગોદાનપુણ્યાધિદૃશિઃ કુગોદા ।
ગોદાસરૈદા ભુવિ સૌભગોદા ગોદાવરી સાઽવતુ નઃ સુગોદા ॥ ૧॥

યા ગૌપવસ્તેર્મુનિના હૃતાઽત્ર યા ગૌતમેન પ્રથિતા તતોઽત્ર ।
યા ગૌતમીત્યર્થનરાશ્વગોદા ગોદાવરી સાઽવતુ નઃ સુગોદા ॥ ૨॥

વિનિર્ગતા ત્ર્યમ્બકમસ્તકાદ્યા સ્નાતું સમાયાન્તિ યતોઽપિ કાદ્યા ।
કાઽઽદ્યાધુની દૃક્સતતપ્રમોદા ગોદાવરી સાઽવતુ નઃ સુગોદા ॥ ૩॥

ગઙ્ગોદ્ધતિં રાતિ મૃતાય રેવા તપઃફલં દાનફલં તથૈવ ।
વરં કુરુક્ષેત્રમપિ ત્રયં યા ગોદાવરી સાઽવતુ નઃ સુગોદા ॥ ૪॥

સિંહે સ્થિતે વાગધિપે પુરોધઃ સિંહે સમાયાન્ત્યખિલાનિ યત્ર ।
તીર્થાનિ નષ્ટાખિલલોકખેદા ગોદાવરી સાઽવતુ નઃ સુગોદા ॥ ૫॥

યદૂર્ધ્વરેતોમુનિવર્ગલભ્યં તદ્યત્તટસ્થૈરપિ ધામ લભ્યમ્ ।
અભ્યન્તરક્ષાલનપાટવોદા ગોદાવરી સાઽવતુ નઃ સુગોદા ॥ ૬॥

યસ્યાઃ સુધાસ્પર્ધિ પયઃ પિબન્તિ ન તે પુનર્માતૃપયઃ પિબન્તિ ।
યસ્યાઃ પિબન્તોઽમ્બ્વમૃતં હસન્તિ ગોદાવરી સાઽવતુ નઃ સુગોદા ॥ ૭॥

સૌભાગ્યદા ભારતવર્ષધાત્રી સૌભાગ્યભૂતા જગતો વિધાત્રી ।
ધાત્રી પ્રબોધસ્ય મહામહોદા ગોદાવરી સાઽવતુ નઃ સુગોદા ॥ ૮॥

સમાપ્લુતા મયા સા યા સિષેવે પૂર્વસાગરમ્ ।
સપ્તવક્ત્રૈસ્તપઃ કૃષ્ણસપ્તમ્યાં સતિ વાસરે ॥ ૯॥

સપ્તસુમેરસુપ્તા સા ગુપ્તા સાગરમધ્યતઃ ।
ગોદાવરી વરીવર્તિ ન નિદ્રાતિ કદાચન ॥ ૧૦॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં ગોદાવરીસ્તોત્રં સમ્પૂર્ણમ્ ।

*Godavari Stotram 2*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*